# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

## द्वितीयपत्रिका

दिनाङ्कः – 01-02-2026 अङ्काः – 50

अपराह्ने – 1:30 तः 3:00 पर्यन्तम् समयः – सार्धैकहोरा

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

1 **विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** 5

१. गणतन्त्रोत्सवः २. हनुमान् ३. एकलव्यस्य गुरुभक्तिः

2 (अ) प्रयोगाः के ? भावे-प्रयोगं सोदाहरणं विशदयत । 4

(आ) चतुर्थीविभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

3 (अ) वक्रोक्ति-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) "तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिः"- अत्र किं वृत्तमिति सलक्षणं सप्रस्तारं च विवृणुत । 4

4 **उत्तरं लिखत । (त्रयाणामेव)** 3

१. अभिधा नाम का ?

२. लिट्-लकारस्य उत्तमपुरुषस्य प्रयोगं दर्शयत ।

३. निर्धारणे समूहवाचकात् शब्दात् का विभक्तिः प्रयुज्यते ?

४. कोष्ठकचिह्नस्य नामान्तरं किम् ?

5 **द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. जज्ञे २. भविता ३. अगमत् ४. अवर्धिष्यत

6 **प्रयोगपरिवर्तनं कुरुत ।** 4

१. अहम् अलज्जे । २. जागर्यते जनैः ।

३. भेतव्यं पापात्, लज्जितव्यं दुस्तर्कात् । ४. भारतेन विजीयताम् ।

**7 वाक्यदोषं परिहरत ।** 4

१. सर्वविधानि दुःखानि त्वं सोढासि ।

२. गोपिकासु नृत्यत्सु सत्सु कृष्णः अदृश्यः अभूत् ।

३. शिष्यः मासाय अधीते ।

४. भगवान् देवान् राक्षसैः त्रायते ।

**8 टिप्पणीं लिखत । (एकस्य)** 2

१. लिट्-लकारः

२. सति-सप्तमी

**9 मातृभाषया अनुवदत ।** 5

१. भवान् खलु क्रीडास्पर्धायां पारितोषिकं लब्धा ।

२. यदि लक्ष्मणः आगमिष्यत् तदा रावणः सीतामपहर्तुं नाशक्ष्यत् ।

३. विद्यार्जनाय यतिषीध्वम् ।

४. अस्तं गते रवौ विहङ्गा अभिनीडान्युदडयन्त ।

५. कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवम् ।

**10 संस्कृतभाषया परिवर्तयत ।** 5

१. ಅಡಿಗೆಯವನು ಅತಿಥಿಗಳಿಗಾಗಿ ಅಡಿಗೆಮಾಡಿದನು.

The cook cooked for the guests.

२. ಆಗ ನೀವು ಅಂಗಡಿಗೆ ಹೋದಿರಿ.

You went to the shop at that time.

३. ವಸ್ತ್ರಗಳಲ್ಲಿ ಬಿಳಿಯ ವಸ್ತ್ರ ನನಗೆ ಹಿಡಿಸುತ್ತದೆ.

Among the clothes, I like white cloth.

४. ಮಳೆಗಾಲ ಬಂದಾಗ ಹೊಳೆಯಲ್ಲಿ ನೀರು ಹೆಚ್ಚುತ್ತದೆ.

When the rainy season comes, the water in the river increases.

५. ಈ ನೆಲದಲ್ಲಿ ತೆಂಗಿನಮರಗಳು ಚೆನ್ನಾಗಿ ಬೆಳೆಯುವುವು.

Coconut trees will grow well in this soil.

---------------------------